श्रीगुरुरुवाच । सम्यक् पृष्टं त्वया विद्वन् ! सावधानेन तत् शृणु । प्रामाणिकी न भवति भ्रान्त्या मोहितकल्पना । भ्रान्तिं विना त्वसङ्गस्य निष्क्रियस्य निराकृतेः । न घटेतार्थसम्बन्धो नभसो नीलतादिवत् । स्वस्य दृग्निर्गुणस्याक्रियस्य प्रत्यगवबोधानन्दरूपस्य बुद्धेः । भ्रान्त्या प्राप्तो जीवभावो न सत्यो मोहापाये नास्त्यवस्तुस्वभावः । यावद्भ्रान्तिस्तावदेवास्य सत्ता मिथ्याज्ञानोज्जृम्भितस्य प्रमादात् । रज्ज्वां सर्पो भ्रान्तिकालीन एव भ्रान्तेर्नाशे नैव सर्पोऽपि तद्वत् । अनादित्वमविद्यायाः कार्य्यस्यापि तथेष्यते । उत्पन्नायान्तु विद्यायामाविद्यकमनाद्यपि । प्रबोधे स्वप्नवत् सर्व्वं सहमूलं विनश्यति । अनाद्यपीदं नो नित्यं प्रागभाव इव स्फुटम् । अनादेरपि विध्वंसः प्रागभावस्य वीक्षितः । यद्बुद्ध्युपाधिसम्बन्धात् परिकल्पितमात्मनि । जीवत्वं न ततोऽन्यस्तत्स्वरूपेण विलक्षणः । सम्बन्धः स्वात्मनो बुद्ध्या मिथ्याज्ञानपुरःसरः । विनिवृत्तिर्भवेत्तस्य सम्यग्ज्ञानेन नान्यथा । ब्रह्मात्मैकत्वविज्ञानं सम्यक् ज्ञानं श्रुतेर्मतम् । तदात्मानात्मनोः सम्यग्विवेकेनैव सिध्यति । ततोविवेकः कर्तव्यः प्रत्यगात्मसदात्मनोः । जलं पङ्कवदत्यन्तं पङ्कापाये जलं स्फुटम् । यथा भाति, तथात्मापि दोषाभावे स्फुटप्रभः । असन्निवृत्तौ तु सदात्मना स्फुटं प्रतीतिरेतस्य भवेत् प्रतीचः । ततो निरासः करणीय एव सदात्मनः साध्वहमादिवस्तुनः । अतोनायं परात्मा स्याद्विज्ञानमयशब्दभाक् । विकारित्वाज्जडत्वाच्च परिच्छिन्नत्वहेतुतः । दृश्यत्वात् व्यभिचारित्वात् नानित्योनित्य इष्यते"। आनन्दमयकोषस्तु आनन्दमयकोषशब्दे ७२६पृ० उक्तः धननिचयात्मककोषस्य राज्याङ्गतामाह "स्वाम्यमात्यौ पुरं राष्ट्रं कोषदण्डौ सुहृत्तथा । सप्त प्रकृतयोह्येताः सप्ताङ्गं राज्यमुच्यते । सप्तानां प्रकृतीनां तु राज्यस्यासां यथाक्रमम् । पूर्व्वं पूर्व्वं गुरुतरं जानीयाद्व्यसनं महत्" मनुः "स्वामी राजा अमात्योमन्त्र्यादिः । पुरं राज्ञः कृतदुर्गनिवासनगरं, राष्ट्रं देशः, कोषोवित्तनिचयः, दण्डो हस्त्यश्वरथपादातं, मित्रं त्रिविधं सप्तमाध्यायोक्तमित्येते सप्त प्रकृतयोऽङ्गानि सप्ताङ्गमिदं राज्यमित्युच्यते । ततः किमतआह सप्तानामिति । आसां राज्यस्य प्रकृतीनां सप्तानां क्रमिकोक्तानामुत्तरस्याविनाशमपेक्ष्य पूर्व्वस्याविनाशरूपं व्यसनं गरीयोजानीयात् । तथाहि मित्रव्यसनात् स्वबलव्यसनं गरीयः सम्पन्नबलस्यैव मित्रानुग्रहे सामर्थ्यात् । एवं बलात् कोषोगरीयान् कोषनाशे बलस्यापि नाशात् । कोषाद्राष्ट्रं गरीयः राष्ट्रनाशे कुतः कोषोत्पत्तिः । एवं राष्ट्राद्दुर्गं गरीयो दुर्गादेव यवसेन्धनादिसम्पन्नाद्राज्यरक्षासिद्धेः । दुर्गादमात्यो गरीयान् प्रधानामात्यनाशे सर्व्वाङ्गवैकल्यात् । अमात्यादपि आत्मा सर्व्वस्यात्मार्थत्वात्" कुल्लू०

कोषसञ्चयस्यावश्यकता युक्तिकल्पतरौ दर्शिता यथा

"कोषो महीपतेर्जीवो न तु प्राणाःकथञ्चन । द्रव्यं हि देहो भूपस्य न शरीरमिति स्थितिः । धर्म्महेतोः सुखार्थाय भृत्यानां भरणाय च । आपदर्थञ्च संरक्ष्यः कोषः कोषवता सदा । धनात् कुलं प्रभवति धनाद्धर्म्मः प्रवर्त्तते । नाधनस्य भवेद्धर्म्मः कामश्चैव कथञ्चन । अधर्म्मान्निधनं कुर्य्यात्तद्धनं गृह्यते परैः । स्वयं पापस्य पात्रं स्यात् सिंहो हस्तिवधादिव । तादात्मिको मूलहरः कदर्य्यस्त्रिविधोऽर्जकः । उत्पन्नार्थव्ययकरो यो भविष्यद्धनाशया । स तादात्मिक आख्यातः कल्याणी तस्य नायतिः । यः पित्राद्यर्ज्जितं वित्तमन्यायेन तु भक्षयेत् । स मूलहर आख्यातस्तदुदर्कोऽपि चाशुभः । स कदर्य्यस्तु यो भृत्यात्मपीडनैरर्थसञ्चयी । तद्धनं राजदायादतस्कराणां निधिर्भवेत् । रक्षा च राजकोषस्य स्तोकस्तोकेन वर्द्धते । अञ्जनञ्च धनञ्चैव स्तोकस्तोकेन हीयते । कोषस्य साधनोपायो मुख्यं राष्ट्रमिति स्मृतम् । कृषिगुणैर्वर्द्धते राष्ट्रं तद्वृद्धिर्नृपवृत्तता । राज्ञोपायेन संरक्ष्या ग्रामे ग्रामे कृषीवलाः । तेभ्यः कृषिस्ततश्चार्था अर्थेभ्यः सर्व्वसम्पदः । शरीरकर्षणात् प्राणाः क्षीयन्ते प्राणिनां यथा । तथा वर्षेषु वर्षेषु कर्षणात् भूगुणक्षयः । एकस्यां गुणहीनायां कृषिमन्यत्र कारयेत्" ।

तत्सञ्चयोपायाश्च भा० शा० ८८अ० दर्शिताः यथा

"यदा राजासमर्थोऽपि कोषार्थं स्यान्महामते ।" इत्यादि युधिष्ठिरप्रश्ने भीष्मोक्तिः "यथादेशं यथाकालं यथाबुद्धि यथाबलम् । अनुशिष्यात् प्रजा राजा धर्म्मार्थी तद्धिते रतः । यथा तासाञ्च मन्येत श्रेय आत्मन एव च । तथा कर्म्माणि सर्व्वाणि राजा राष्ट्रेषु वर्त्तयेत्" इत्युपक्रमे "मधुदोहमित्याद्युक्तं" तच्च करशब्दे १६८७पृ० दर्शितम् । तत्र ८०अ० इत्युक्तिः प्रामादिकी ८८अ० इत्येव साधु । ततः परं कियदन्तरे

"प्रयोगं कारयेत्तांस्तान् तथा बलिकरांस्तथा । कृषिगोरक्षवाणिज्यं यच्चान्यत् किञ्चिदीदृशम् । पुरुषैः कारयेत्